# श्री तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे
महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं
भवशंकर देशिक मे शरणम् ।। 1 ।।

करुणावरुणालय पालय मां
भवसागरदु:खविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं
भवशंकर देशिक मे शरणम् ।। 2 ।।

भवता जनता सुहिता भविता
निजबोधविचारण चारुमते ।
कलयेश्वर जीवविवेकविदं
भवशंकर देशिक मे शरणम् ।। 3 ।।

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं
भवशंकर देशिक मे शरणम् ।। 4 ।।

# श्री तोटकाष्टकम्

सुकृतेऽधिकृते बहुधा भवतो
भविता समदर्शनलालसता।
अतिदीनमिमं परिपालय मां
भवशंकर देशिक मे शरणम् ।।5।।

जगतीमवितुं कलिताकृतयो
विचरन्ति महामहसश्छलतः।
अहिमांशुरिवात्र विभासि गुरो
भवशंकर देशिक मे शरणम् ।।6।।

गुरुपुंगव पुंगवकेतन ते
समतामयतां नहि कोऽपि सुधीः।
शरणागतवत्सल तत्वनिधे
भवशंकर देशिक मे शरणम् ।।7।।

विदितानमया विशदैककला
न च किंचन काञ्चनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सहजां
भवशंकर देशिक मे शरणम् ।।8।।